केन्द्रीय विद्यालय संगठनम्, रायपुर संभागः

सत्रान्त परीक्षा (2024-25)

कक्षा- अष्टमी **विषयः - संस्कृतम्**

<u>समय 2:30 होराः</u> **<u>पूर्णांकः 60</u>**

निर्देशाः अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति | सर्वे प्रश्नाः अनिवार्याः सन्ति |

1. **खण्ड (क) अपठित-अवबोधनम् (10 अङ्काः)**
2. **खण्ड (ख) रचनात्मकं कार्यम् (15 अङ्काः)**
3. **खण्ड (ग) अनुप्रयुक्त-व्याकरणम् (15 अङ्काः)**
4. **खण्ड (घ) पठित-अवबोधनम् (20 अङ्काः)**

~~~~~~

खण्ड (क) अपठित – अवबोधनम् (10)

1. अधोलिखित-गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत—

शिक्षाप्राप्तिः मानवजीवनस्य महती आवश्यकता अस्ति। शिक्षाम् प्राप्य एव मनुष्यः मनुष्यः जायते। विद्याहीनः नरः पशुः एव कथ्यते। पुराकाले गुरु-शिष्य-परम्परा आसीत् | सा इदानीम् दुर्लभा अस्ति। अद्यत्वे तु अनेके विद्यालयाः, महाविद्यालयाः, विश्वविद्यालयाः च सन्ति परन्तु तेषु वैदेशिक-शासनकालीना एव शिक्षाप्रणाली प्रचलिता अस्ति। वर्तमान-शिक्षाप्रणाल्याम् मातृभाषायाः राष्ट्रभाषायाः च अधिकम् ज्ञानम् न दीयते। अनेके शिक्षिताः छात्राः निजमातृभाषायाम् पंक्तिद्वयम् अपि लेखितुम् न शक्नुवन्ति। भारतवर्षे शिक्षाप्रणाली तादृशी स्यात् या सर्वेभ्यः हितकारी भवेत्।

I.एकपदेन उत्तरत – **1x 2 = 2**

(i) मानवजीवनस्य महती आवश्यकता का अस्ति?

उत्तरः---

(ii) पशुः कः कथ्यते ?

उत्तरः---

II .पूर्णवाक्येन उत्तरत- **2x2=4**

(i) अद्यत्वे कीदृशी शिक्षाप्रणाली प्रचलिता अस्ति ?

उत्तरः---

(ii) वर्तमान-शिक्षाप्रणाल्याम् कस्याः अधिकम् ज्ञानम् न दीयते ?

उत्तरः---

III. अस्य गद्यांशस्य उचितं शीर्षकं लिखत | उत्तरः--- **1x1=1**

IV.भाषिक कार्यम् – **1x3=3**

(i) "सा इदानीम् दुर्लभा अस्ति" अस्मिन वाक्ये किं क्रियापदम्?

(क) इदानीम् (ख) दुर्लभा (ग) अस्ति
~~~~~~

(ii) 'अधुना" इति पदस्य किं पर्यायपदं अत्र दत्तम्?

(क) अद्यत्वे (ख) पुराकाले (ग) इदानीम्

(iii) "मानवजीवनस्य महती आवश्यकता" अत्र विशेषण-पदं किम् ?

(क)मानवजीवनस्य (ख) महती (ग) आवश्यकता

खण्ड (ख) रचनात्मकं कार्यम् (15)

2. चित्रम् दृष्ट्वा मञ्जूषायाः सहायतया संस्कृते पञ्च वाक्यानि रचयत – 1x 5= 5



(मञ्जूषा–अस्त्राणाम्, भवति, अस्त्राणि, प्रयोगः, उपग्रहाणां)

(क) अस्मिन् चित्रे----------दृश्यन्ते|

(ख) ऐतेषाम् अस्त्राणां ----------युद्धे भवति |

(ग) भारतः एतादृशानां ----------प्रयोगेण विकसितदेशः मन्यते |

(घ) अत्र परमाणुशक्तिप्रयोगः अपि ---------- |

(ङ) ----------सहायतया बहूनि कार्याणि भवन्ति |

3. मञ्जूषायाःपदानि चित्वा अधोलिखितं संवादं पूरयत- 1x5=5

(मञ्जूषा– वाल्मीकिः, श्रीरामस्य , पुस्तकम् , संस्कृत भाषायाम् , रामायणम्)

आनन्दः - मित्र राकेश! तव प्रियं (i) .....किम् अस्ति?

राकेशः - मम प्रियं पुस्तकं (ii) ..... अस्ति|

आनन्दः- रामायणं कस्यां भाषायां लिखितम् अस्ति ?

राकेशः – रामायणं (iii) ..... लिखितम् अस्ति |

आनन्दः- रामायणस्य रचयिता कः अस्ति?

राकेशः- आदिकविः (iv) ..... रामायणस्य रचयिता अस्ति |

आनन्दः – रामायणे किं वर्णितम् अस्ति ?

राकेशः – रामायणे (v) ..... वर्णितम् अस्ति |

4. अधोलिखितपदानि आधृत्य संस्कृत –वाक्यानि रचयत- 1x5=5

नित्यम् - .....|

वैज्ञानिकः – .....|

तपः - .....|

उपविष्टः - .....|

स्वकीयम् - .....|

खण्ड (ग) अनुप्रयुक्त-व्याकरणम् (15)

5.उचित-पदेन सन्धिं विच्छेदं पूरयत – **1x4=4**

(i)प्रथमोपग्रहस्य = ---------- + उपग्रहस्य |

(ii) ग्रीष्मर्तौ = ---------- + ऋतौ |

(iii) कालातिगामिनी = ----------+ अतिगामिनी |

(iv) तथैव = ---------- + एव |

6. उदाहरणमनुसृत्य निर्देशानुसारं लकारपरिवर्तनं कुरुत- **1×4=4**

यथा- सा शिक्षिका अस्ति। (लङ्लकारः) सा शिक्षिका आसीत्।

(क) सा अध्यापने संलग्ना भवति। (लृटलकारः)[भविष्यति/ भविष्यतः / भविष्यन्ति]

(ख) सः त्रयोदशवर्षकल्पः अस्ति।(लङ्लकारः) [आसन् / आसीत् / आस्ताम्]

(ग) महिलाः तडागात् जलं नयन्ति । (लोट्लकारः) [नयतु/ नयन्तु / नयाम]

(घ) वयं प्रतिदिनं पाठं पठामः। (विधिलिङ्) [पठेव / पठेयम् / पठेम]

7. मञ्जूषातः चित्वा उचिताव्ययेन वाक्यपूर्तिं कुरुत– **1/2x6=3**

यथा , अपि , तावत् , **एव** , नित्यं, यादृशम्,

(i) तयोः ..... प्रियं कुर्यात्।

(ii) ..... कर्म करिष्यसि। तादृशं फलं प्राप्स्यसि

(iii)..... राजा तथा प्रजा ।

(iv) यावत् सफल: न भवति ..... परिश्रमम् कुरु ।

(v) वर्षशतैः ..... निष्कृतिः न कर्तुम् शक्या |

(vi) तेषु ..... त्रिषु तुष्टेषु तपः समाप्यते |

8. समुचित –विशेषण –विशेष्य पदानि मेलयत– **1X 4=4**

(क)	(ख)
अयम्	इतिहासे
महत्त्वाधायिनी	समवायः
प्राचीने	प्रदेशः
एकः	संस्कृतिः

खण्ड (घ) पठित –अवबोधनम् (20)

9. अधोलिखित -गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत --

सामाजिककुरीतीनाम् सावित्री मुखरम् विरोधम् अकरोत् । विधवानाम् शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितै: मिलिता। फलत: केचन नापिता: अस्याम् रूढ़ौ सहभागिताम् अत्यजन्। एकदा सावित्र्या मार्गे दृष्टम् यत् कूपम् निकषा शीर्णवस्त्रावृता: तथाकथिता: निम्नजातीया: काश्चित् नार्य: जलम् पातुम् याचन्ते स्म। उच्चवर्गीया: उपहासम् कुर्वन्त: कूपात् जलोद्धरणम् अवारयन्।

I .**एकपदेन उत्तरत** -- **1/2x 2=1**

(i) का सामाजिककुरीतीनाम् मुखरम् विरोधम् अकरोत् ?

उत्तर:----------

(ii) के उपहासम् कुर्वन्त:?

उत्तर:----------

II .पूर्णवाक्येन उत्तरत – **1x 2=2**

(i) कासाम् शिरोमुन्डनस्य निराकरणाय सावित्री नापितै: मिलिता ?

उत्तर:----------

(ii) सावित्र्या मार्गे किम् दृष्टम् ?

उत्तर:----------

III भाषिककार्यम् **1/2x 2=1**

(i)"नापिता: अस्याम् रूढ़ौ सहभागिताम् अत्यजन्" अत्र किम् क्रियापदम् ?

[नापिता / रूढौ / अत्यजन्]

(ii) निकटम् इत्यर्थे किम् पर्याय पदम् प्रयुक्तम् ?

[नार्यः / निकषा / कूपम्]

10. अधोलिखितं पद्यांशंपठित्वा प्रश्नानाम् उत्तराणि लिखत --

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् |
न तस्य निष्कृति: शक्या कर्तुं वर्षशतैरपि ' ||

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् |
सत्यपूतां वदेद्वाचं , मनः पूतं समाचरेत् ||

I .एकपदेन उत्तरत -- **1/2x 2=1**

(i) केषां सम्भवे मातापितरौ क्लेशं सहेते ?

उत्तर:----------

(ii) वस्त्रपूतं किं पिबेत् ?

उत्तर:----------

II .पूर्णवाक्येन उत्तरत – **1x 2=2**

(i) कथम् समाचरेत् ?

उत्तर:----------

(ii) नृणाम् सम्भवे कौ क्लेशम् सहेते ?

उत्तर:----------

III भाषिककार्यम् **1/2x 2=1**

(i) 'चरणम्' इत्यर्थे किम् पर्याय पदम् प्रयुक्तम् ?

[वस्त्रम् / पादम् / कष्टम्]

(ii) 'मातापितरौ क्लेशं सहेते' अस्मिन् वाक्ये किम् क्रियापदम् प्रयुक्तम्

[मातापितरौ/ सहेते/ क्लेशम्]

11.अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

राजीवः– भवति ! गृहे यथा सर्वाधिकारम्या मनोरमा च भगिनी भवति तथैव भारतगृहे अपि सर्वाधिका: रम्या: इमा: सप्तभगिन्य: सन्ति|

अध्यापिका : - मनस्यागता ते इयम् भावना परं कल्याणमयी परम् सर्वे न तथा अवगच्छन्ति।अस्तु, अस्ति तावदेतेषाम् विषये किञ्चिद् वैशिष्ट्यमपि कथनीयम्। सावहितमनसा शृणुत- जनजातिबहुलप्रदेश: अयम्। गारो-खासी-नगा-मिज़ो-प्रभृतय: बहव: जनजातीया: अत्र निवसन्ति।

I .एकपदेन उत्तरत -- **1/2x 2=1**

(i) गृहे सर्वाधिका रम्या मनोरमा का भवति ?

उत्तर:----------

(ii) अत्र के निवसन्ति ?

उत्तर:----------

II .**पूर्णवाक्येन उत्तरत** – **1x 2=2**

(i) मनसि आगता का परं कल्याणमयी ?

उत्तर:----------

(ii) एतेषाम् विषये किम् कथनीयम् ?

उत्तर:----------

III भाषिककार्यम् **1/2x 2=1**

(i) 'भारतगृहे अपि सर्वाधिका: रम्या: इमा: सप्तभगिन्य: सन्ति' अस्मिन् वाक्ये किम् क्रियापदम् प्रयुक्तम्

[अपि / रम्याः / सन्ति]

(iii) 'सर्वे न तथा अवगच्छन्ति' अस्मिन् वाक्ये किम् कर्तृपदम् अस्ति ?

[सर्वे / तथा / अवगच्छन्ति]

12. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत– **1/2x 4=2**

(क) वृद्धोपसेविनः आयुर्विद्या यशोबलं च वर्धन्ते ।

उत्तर:----------

(ख) वयं स्वदेशस्य राज्यानां विषये ज्ञातुम् इच्छामः ।

उत्तर:----------

(ग) जागरूकतया एव स्वच्छता अभियानमपि गतिम् प्राप्स्यति।

उत्तर:----------

(घ) सूर्यः पूर्वदिशायाम् उदेति।

उत्तर:----------

13. घटनाक्रमानुसारं वाक्यानि पुनः लिखत – **½ x 8 =4**

(i) उपरितः अवकरं क्षेप्तुम् उद्यतां रोजलिन् बालाः प्रबोधयन्ति |

(ii) प्लास्टिकस्य विविधपक्षान् विचारयितुं पर्यावरणसंरक्षणेन पशून् इत्यादीन् रक्षितुं बालाः कृतनिश्चयाः भवन्ति |

(iii) गृहे प्रचण्डोष्मणा पीडितानि मित्राणि एकैकं कृत्वा गृहात् बहिरागच्छन्ति |

(iv) अन्ते बालाः जलविहारं कृत्वा प्रसीदन्ति |

(v) शाकफलानाम् आवरणैः सह प्लास्टिकस्यूतमपि खादन्तीं धेनुं बालकाः कदलीफलानि भोजयन्ति |

(vi) वृक्षाणां निरन्तरं कर्तनेन , ऊष्मावर्धनेन च दुःखिताः बालाः नदीतीरं गन्तुम् प्रवृत्ताः भवन्ति |

(vii) बालैः सह रोज़लिन् अपि मार्गे विकीर्णमवकरं यथास्थानं प्रक्षिपति |

(viii) मार्गे यत्र तत्र विकीर्णमवकरं दृष्ट्वा पर्यावरणविषये चिन्तिताः बालाः परस्परं विचारयन्ति |

उत्त

र:----------

****